This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M112 विषय स्तोत्र.

नाव. गणेशापमार्जनम्.

लेखक/लिपीकार —.

पृष्ठ ४ काळ — पूर्ण/अपूर्ण

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Complete ms 36/6178

१

(24)

॥अथगणेशशापमार्जनप्रारंभः॥श्रीः॥

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदादीन्यायुधानि च॥रक्षंति सकलापद्भ्यो येनातोषि गजाननः
॥३४॥नारद उवाच॥अनाराधितविघ्नेशा येनरा दुःखभागिनः॥तेषां
दुःखाभिभूतानां यत्कर्त्तव्यं दयालुभिः॥३५॥यज्जाड्यैः सर्वभूत्यर्थं गणा
धीशं दयानिधे॥तदुपायं ब्रूहि स्कंदं येन सौख्यं भवेन्नृणां॥३६॥ब्रह्मो
वाच॥शमीगर्भस्थितो वह्निः शमी गणपतेः प्रिया॥शमीदलान्युपस्थ
भूय सर्वगात्राणि मार्जयेत्॥३७॥दूर्वाभिस्तद्दलाभिर्वा तद्दलाभिः कुठार
पि॥गाणपत्यो विशेषेण शुचिस्तत्कृतमानसः॥३८॥रोगग्रहविषा
र्तानां कुर्याच्छांतिमिमां शुभां॥विनायकं मयूरेशं हेरंबं च गणेश्वरं ३९
ध्यात्वा कृत्वा नमो दिक्षु नामान्यथ विनिर्दिशेत्॥पूर्वे रक्षतु विघ्नेशा आ
ग्नेय्यामाखुवाहनः॥२०॥याम्यां मदोत्कटः पातु नैरृत्यां गणनायकः॥
पश्चिमे वक्रतुंडश्च वायव्यां भीमकुंडोदर॥२१॥उत्तरे शिवपुत्रश्च ई
शान्यां बुद्धिनायकः॥ऊर्ध्वे विनायकः पातु अधः फणिविभूषणः २२
महागणपतिः पातु सर्वतः सर्वरक्षकः॥एवं दिग्बंधनं कृत्वा करन्या
समथाचरेत्॥२३॥अंगुष्ठाग्रे गणाधीशं तर्जन्यां सिंहवाहनं॥अ
श्वारूढं मध्यमायां मनामिकायां शिवात्मजं॥२४॥करिवक्त्रं कनिष्ठि
कायां करमध्ये विनायकं॥पृष्ठे आखुरथं न्यस्य मणिबंधे मदोत्कटं॥२५
एवं न्यासं करे कृत्वा पश्चादंगेषु योजयेत्॥गणाधीशं ललाटे तु विघ्न
नाथं भ्रुवोर्न्यसेत्॥२६॥महोत्कटं लोचनयोः श्रोत्रयोर्धूम्रसूदनं॥
विनायकं कपोले तु स्कंदमुखं कर्णमूलयोः॥२७॥एकदंतं दंतपंक्तौ विक
टं चिबुके न्यसेत्॥उत्तरोष्ठे लंबकर्णं शूर्पकर्णं तथाधरे॥२८॥जिह्वाया
मंबिकापुत्रं तालुके मूषकध्वजं॥हैमातुरं कंठमध्ये हेरंबं नासिकोप
रि॥२९॥दक्षिणे तु भुजे वत्सं चंद्रानुग्रहदं न्यसेत्॥वामे वा स्कंदकिश्च

ग॰अपा॰
२

षाद्ध्वंस्कदंतंहृदयेन्यसेत्॥३०॥भालचंद्रंचोदरेतुनाभौगणपतिं
न्यसेत्॥दक्षिणेतुकरेवत्सविन्यसेदाखुकेतनं॥३१॥त्रिनेत्रतनयंवा
मेवक्रतुंडंकटौन्यसेत्॥पृष्ठेपरशुहस्तंतुस्कंधयोःसौम्यलोचनं ३२
एकदंतंवामकुक्षौदक्षिणेविश्वरूपिणं॥मेंढ्रेकश्यपपुत्रंतुऊर्वोःपा
शाकरंन्यसेत्॥३३॥शुंडिनंजानुमध्येतुजंघयोर्दितिजंन्यसेत्॥गुल्
फयोर्गजवक्त्रंचपादयोरमितद्युतिं॥३४॥अंगुल्यग्रेसिद्धिधरंविष
माक्षंतुसंधिषु॥नखेषुतुंदिलंचैवधूम्रवर्णंतलेन्यसेत्॥३५॥रोमकूप
षुकपिलंरक्तंरक्तास्थिमज्जसु॥मनोबुद्धिरहंकारश्चित्तेकश्यपनंद
नं॥३६॥एवंन्यासविधिंकृत्वासाक्षाद्गणपतिर्भवेत्॥बीजपुरंपुरः
पातुआग्नेय्यांतुगदावतु॥याम्यामिक्षुधनुःपातुत्रिशूलंनैर्ऋतीदि
शं॥चक्रंपश्चिमतःपातुकमलंवायवीदिशं॥३८॥पाशउत्तरदिग्भा २

×पूजाकालेतुदेवस्यजपकालेतथैवच॥५

गेईशान्यामुत्पलंपुनः॥ऊर्ध्वंव्रीहयग्रमवतुस्वविषाणमधोवतु॥३९॥
छिद्रस्थानेषुसर्वेषुरत्नकुंभःसदावतु॥तत्तुर्गाणेश्वरीतस्ययावत्किं
चिन्नभाषेत॥४०॥आत्मनश्चपरस्यापिविधिरेषउदाहृतः॥अपा
मार्जनकंन्यासंसर्वरोगप्रणाशनं॥४१॥गाणेश्वरेणकर्त्तव्यंसर्वसिद्धि
प्रदायकं॥इत्यपामार्जनंन्यासंकृत्वातुकवचंपुरा॥४२॥ॐगंगणपत
येनमः॥ममसकलरोगान्निवारयनिवारयसकलापद्योरक्षरक्षस्वाहा
॥४३॥इतिसर्वत्रविन्यस्यत्रिसंध्यासुजितेंद्रियः॥अभयंसर्वभूतेभ्यो
निजलोकंसगच्छति॥४४॥अस्यश्रीअपामार्जनमालामंत्रस्यब्रह्मात्रऋ
षिः॥श्रीमहागणपतिर्देवता॥नानाविधानिछंदांसि॥ममसकलरोग
शांतयेसर्वाभीष्टफलप्राप्तयेजपेचविनियोगः॥गणेशायगुणेशाय
निर्गुणायगुणात्मने॥पूर्णायपरमेशायविघ्नराजायसंमुदे॥४५॥अरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰अपा॰ पवकुरूपायव्यापिनेपरमात्मने॥अकल्मषायशुद्धायध्यातुःपापहरा
४ यच॥४६॥विनायकायधूम्रायमयूरेशायसर्वज्ञः॥चिंतामणिगणे
शायगजदंतधरायच॥४७॥नमस्कृत्यप्रवक्ष्यामियथासिद्धतुमेवचः
चतुर्थशतिथिजातायसर्वसंकटहारिणे॥४८॥नमस्कृत्यप्रवक्ष्यामिये
नसिद्धतुमेवचः॥आखुध्वजमयूरेशदेवदेवजगत्पते॥४९॥सिद्धिबु
द्धिप्रदात्रेचसकलंमेहराऽशुभं॥गणनाथगणाधीशगजाननगणेश्व
र॥५०॥ढुंढिराजगदापाणिदंतायुधधरप्रभो॥मृत्युबंधान्निभयदंदु
र्दिष्टस्यचयत्फलं॥५१॥परापध्यानसहितंप्रयुक्तंचाभिचारिकं॥गरस्प
र्शमहारोगंप्रयोगंचयथाकृतं॥५२॥ऐकाहिकंद्व्याहिकंचत्र्याहिकंचम
हाज्वरं॥चातुर्थिकंपाक्षिकंवासन्निपातज्वरंतथा॥५३॥दोषमामय ४
संभूतमपस्मारंभगंदरं॥शिरोरोगंनेत्ररोगंकर्णरोगमथाखिलं॥५४॥

वल्मीकपीनसंहिक्कांसंधिश्लेष्मक्षयंतथा॥कासश्वासंतथादद्रूलूता
विस्फोटकंतथा॥५५॥मेहप्लीहयक्ष्मगुल्मवमिकृमिरुजंपुनः॥दद्रादोर्द
ण्डहृद्देवोमहागणपतिःक्षणात्॥५६॥हरतुप्रणतःप्राणत्राणकारीशि
वात्मजः॥उक्तानुक्ताश्चयेरोगायेचजन्मांतरार्जिताः॥५७॥तेसर्वेविल
यंयांतुहेरंबस्यभयार्दिताः॥डाकिन्यःपिशाचिनाशिन्योभूतावैतालि
कास्तथा॥५८॥तेसर्वेविलयंयांतुढुंढिराजभयातुराः॥स्थावरंजंगमं
चैवकृत्रिमंचापियद्विषं॥५९॥दंतोद्भूतंनखोद्भूतमाकाशप्रभवंतथा॥
पिशाचप्रभवंयच्चविषमत्यंतदुःसहं॥६०॥शमयित्वाशुभगवान्परमा
त्मागजाननः॥ह्रीं क्रों ॐ नमः॥सर्वविघ्नाधिपतयेसर्वार्थसिद्धिदायसर्व
दुःखप्रशमनायएह्येहिभगवन्सर्वदुष्टरोगान्बाधय२स्तंभय२ह्रीं गं
नमःस्वाहा॥क्रौं ह्रीं द्विरदास्यमयूरेशनामोच्चारणभेषजात्॥क्षीयंते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकलारोगाः सत्यंसत्यंनसंशयः॥६१॥यहाबालग्रहाश्चैवपिशाचाय
क्षराक्षसाः॥नश्यंतिस्मरणादेवंमहागणपतेःप्रभो॥६२॥अतिसारज्व
राघोराकूरमांडाज्जंभकादयः॥तेसर्वेप्रशामंयांतिविघ्नराजेनतर्जिताः ६३
सिंहव्याघ्रवराहोष्ट्रखरमार्जारमूषकाः॥चौराश्चराजचौराश्चशत्रवो
दुष्टचेतसः॥६४॥तेसर्वेविलयंयांतुधर्षिताधूम्रकेतुना॥प्राच्यांदिशि
प्रतीच्यांचदक्षिणोत्तरयोस्तथा॥६५॥विदिक्षुदिक्षुसर्वासुहेरंबःपा
तुमांसदा॥उक्तानुक्तस्थलेषव्यात्सदादेवोमहोत्कटः॥६६॥स्मरणेन
गणेशस्यक्षयमेनांसियांतितत्॥तेनसत्येनसकलंदुष्टमस्यप्रशाम्यतु
॥६७॥यथाविघ्नेश्वरोदेवःपुराणेषुप्र गीयते॥सत्येनतेनसकलंयन्म
योक्तंतथास्तुतत्॥६८॥शमीपत्रैर्गणेशस्यसदासंतोषसाधकैः॥संमा ५
र्जितंमयागात्रमरोगंभवतुक्षणात्॥६९॥मदोत्कटोगणाध्यक्षोधूम्र

केतुर्द्विपाननः॥शांताःसमस्तरोगास्तेग्रहाःसर्वविषाणिच॥७०॥भू
तानिप्रलयंयांतिसंस्मृतेविघ्नसूदने॥एतत्समस्तरोगेषुभूतग्रहभयेषु
च॥७१॥अपामार्जनकंस्तोत्रमिभास्याद्धाभिमंत्रितं॥इयंशमीविघ्नग
णेश्वरप्रियागणेश्वरोहंस्वयमेवचागतः॥अस्मिन्नरेदुष्टमशेषमस्ति
स्वस्थोभवत्येषगणेशवाक्यतः॥७२॥शांतिरस्तुशिवंचास्तुदुष्टमस्य
प्रशाम्यतु॥यदस्यदुरितंकिंचित्तत्क्षिप्तंलवणांभसि॥७३॥स्वास्थ्यम
स्यसदैवास्तुसिद्धिबुद्धीशकीर्तनात्॥यतएवागतंपापंतत्रैवप्रतिगच्छ
तु॥७४॥एतद्रोगादिपीडासुजंतूनांहितमिच्छता॥गाणेश्वरेणकर्तव्यम
पामार्जनकंपरं॥७५॥अनेनसर्वदुःखानिप्रशामंयांत्यसंशयः॥सर्वभूत
हितार्थायकुर्यात्तस्मात्सदैवहि॥७६॥गणेशप्रियकृत्स्तोत्रंयःपठेत्प्रय
तःसदा॥तस्यरोगानबाध्यंतेसत्यमेतद्ब्रवीम्यहं॥७७॥सकृत्सवनमात्रेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰अपामा॰ भालचंद्रप्रभावतः॥ अश्वमेधसहस्येस्त्र फलंप्रा प्नोतिनिश्चितं॥७८॥

६ अपामार्जनकंस्तोत्रंगणेशप्रीतिवर्धनं॥सकृदुच्चरितंयेनतस्यमुक्तिः

करेस्थिरा॥७९॥एकमुखस्तवराजोयंमुखेयस्यविराजते॥एकमुखीभू

यसद्योसौनिजलोकमवाप्नुयात्॥८०॥इयंसंजीविनीविद्यादेवानामपि

दुर्लभा॥अभिषिक्तोमयाजंतुर्मृत्युग्रस्तोपिजीवति॥८१॥प्रसन्नेन

गणेशस्यमह्यमुक्तस्तवोह्यसौ॥लोकोपरिदयांकृत्वामयातुभ्यंप्रका

श्यते॥८२॥ ॥इतिब्रह्मांडपुराणेब्रह्मनारदसंवादेगणेशापामार्ज

नस्तोत्रमितिशिवं॥श्रीमदद्वैतसच्चिदानंदेंद्रसरस्वतीगुरुचरणारविं

दार्पणमस्तु॥शके१७५६विजयाब्देकार्तिककृष्ण१५मंदवासरेमोघेइ

त्युपनाम्नासीतारामेणलिखितं॥श्रीहेरंबार्पणमस्तु॥ ॥ ॥ ६

श्रीगजानन॥अथगणेशापामार्जनांगन्यासः॥प्रणवादिनमोंतंसर्वत्र॥

ॐविघ्नेशायनमः पूर्वस्यांरक्षतु॥आखुवाहनाय॰आग्नेय्यां॥मदोत्कटाय॰

याम्यां॥गणनायकाय॰नैर्ऋत्यां॥हेरंबाय॰पश्चिमायां॥ढुंढुरेश्वराय॰

वायव्यां॥शिवपुत्राय॰उत्तरस्यां॥बुद्धिनाथकाय॰ईशान्यां॥विनाय

काय॰ऊर्ध्वस्यां॥फणिविभूषणाय॰अधरस्यां॥महागणपतये॰सर्वरक्ष

काय॰सर्वतःरक्षतु॥इतिदिग्बंधनं॥करन्यासः॥ॐगणाधीशाय॰अंगुष्ठा॰

सिंहवाहनाय॰तर्जनी॥अश्वारूढाय॰मध्यमा॥शिवास्कताय॰अनामि

का॥करिवक्त्रायकनिष्ठिका॰विनायकाय॰करतलकर॥मदोत्कटाय॰

मणिबंधाभ्यां॰इतिकरन्यासः॥अथांगन्यासः॥ॐगणाधीशाय॰लला

टे॥विघ्ननाथाय॰भ्रुवोः॥महोत्कटाय॰लोचनयोः॥दुष्टसूदनाय॰श्रोत्र

योः॥विनायकाय॰कपोले॥एकमुखाय॰कर्णमूलयोः॥एकदंताय॰दंतपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठे॥विकटाय॰चुबुके॥लंबकर्णाय॰उत्तरोष्ठे॥शूर्पकर्णाय॰अधरोष्ठे॥अं
बिकापुत्राय॰जिह्वायां॥मूषकध्वजाय॰तालुमूले॥द्वैमातुराय॰कंठम
ध्ये॥हेरंबाय॰नासिकायां॥चंद्रानुग्रहदाय॰दक्षिणभुजे॥वासुकीष्टि
षणाय॰वामभुजे॥स्कंदंताय॰हृदये॥भालचंद्राय॰उदरे॥गणपतये॰ना
भौ॥आखुकेतनाय॰दक्षिणकरे॥त्रिनेत्राय॰वामकरे॥वक्रतुंडाय॰क
ट्यो॥परशुहस्ताय॰पृष्ठे॥सौम्यलोचनाय॰स्कंधयोः॥एकदंताय॰वा
मकुक्षौ॥विश्वरूपिणे॰दक्षिणकुक्षौ॥कश्यपपुत्राय॰मेंढ्रे॥पात्राकराय॰
ऊरुभ्यां॥शुंडिने॰जानुमध्याभ्यां॰॥दितिजाय॰जंघाभ्यां॰॥गजवक्त्राय॰
गुल्फाभ्यां॰॥अमितद्युतये॰पादाभ्यां॰॥सिद्धिधराय॰अंगुल्यग्रेषु॥विष
माक्षाय॰संधिषु॥तुंदिलाय॰नखेषु॥धूम्रवर्णाय॰पादतले॥कपिलाय॰
रोमकूपेषु॥धूम्रवर्णाय॰पादतले॥कपिलाय॰रोमकूपेषु॥रक्ताय॰रक्ता

स्थिमज्जसु॥कश्यपनंदनाय॰मनोबुद्धिचित्ताहंकारेषु॥एवंन्यासान्कृत्वा ग
णपतिरहंभावयेत्॥बीजापूराय॰पुरतःपातु॥गदायै॰आग्नेय्यां॰॥इक्षुधनु
षे॰याम्यां॥त्रिशूलाय॰नैर्ऋत्यां॥चक्राय॰पश्चिमां॰॥कमलाय॰वायव्यां॰॥
पाशाय॰उत्तरांदि॰उत्पलाय॰ऐशान्यां॰॥व्रीह्यग्राय॰ऊर्ध्वां॰॥स्वविषाणा
य॰अधोदि॰॥रत्नकुंभाय॰सर्वेष्वपि हस्तानेषु पांतु॥ ॥एवंन्यासविधिं
कृत्वा तनुर्गणेश्वरीभवति॥ ॥इत्यपामार्जनन्यासः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=09.08.19 10:44
,TRANSFERRED=2019/08/09 at 10:54:29
,PAGES=8
,TYPE=STD
,NAME=S0001406
,Book Name=M-112-GANESH PARMAJANAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection